# Shri Mallikarjuna Prapatti

# શ્રીમલ્લિકાર્જુન પ્રપત્તિઃ

## Document Information

Text title : Mallikarjuna Prapatti

File name : mallikArjunaprapattiH.itx

Category : shiva, prapatti

Location : doc_shiva

Latest update : July 7, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2020

*sanskritdocuments.org*

# શ્રીમલ્લિકાર્જુન પ્રપત્તિઃ

જય જય જય શમ્ભો ! જમ્ભભિત્પૂર્વદેવ
    પ્રણતપદસરોજદ્વન્દ્વ ! નિર્દ્વન્દ્વ ! બન્ધો !
જય જય જય જન્મસ્થેમસંહારકાર !
    પ્રણયસગુણમૂર્તે ! પાલયાસ્માન્ પ્રપન્નાન્ ॥ ૧॥

વધૂમુખં વલ્ગદપાઙ્ગરેખમખણ્ડિતાનન્દકરપ્રસાદમ્ ।
વિલોકયન્ વિસ્ફુરદાત્મભાવસ્સ મે ગતિશ્શ્રીગિરિસાર્વભૌમઃ ॥ ૨॥

કુરઙ્ગપાણિઃ કરુણાવલોકઃ સુરોત્તમશ્ચન્દ્રકલાવતંસઃ ।
વધૂસહાયસ્સકલેષ્ટદાતા ભવત્યસૌ શ્રીગિરિભાગ્યરાશિઃ ॥ ૩॥

સન્ધ્યારમ્ભવિજૃમ્ભિતં શ્રુતિશિરસ્થ્સાનાન્તરાધિષ્ઠિતં
    સપ્રેમભ્રમરાભિરામમસકૃત્સદ્વાસનાશોભિતમ્ ।
ભોગીન્દ્રાભરણં સમસ્તસુમનઃપૂજ્યં ગુણાવિષ્કૃતં
    સેવે શ્રીગિરિમલ્લિકાર્જુનમહાલિઙ્ગં શિવાલિઙ્ગિતમ્ ॥ ૪॥

યા મૂલં સચરાચરસ્ય જગતઃ પુંસઃ પુરાણી સખી
    વ્યક્તાત્મા પરિપાલનાય જગતામાપ્તાવતારસ્થિતિઃ ।
દુષ્ટધ્વંસ-સદિષ્ટદાનવિધયે નાનાસનાધ્યાસિની
    શ્રીશૈલાગ્રનિવાસિની ભવતુ મે શ્રેયસ્કરી ભ્રામરી ॥ ૫॥

યત્તેજઃ પરમાણુરેતદખિલં નાનાસ્ફુરન્નામભિઃ
    ભૂતં ભાવિ ભવચ્ચરાચરજગદ્વૃત્તે બહિશ્ચાન્તરે ।
સા સાક્ષાત્ ભ્રમરામ્બિકા શિવસખી શ્રીશૈલવાસોત્સુકા
    દિશ્યાદાશ્રિતલોકકલ્પલતિકા શ્રેયાંસિ ભૂયાંસિ નઃ ॥ ૬॥

શરણં તરુણેન્દુશેખરશ્શરણં મે ગિરિરાજકન્યકા ।
શરણં પુનરેવ તાવુભૌ શરણં નાન્યદુપૈમિ દૈવતમ્ ॥ ૭॥

ઇતિ શ્રીમલ્લિકાર્જુન પ્રપત્તિઃ સમાપ્તા ।

*Shri Mallikarjuna Prapatti*

pdf was typeset on February 1, 2020

Please send corrections to *sanskrit@cheerful.com*